दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णप्रतिपदा
ज्येष्ठ १८ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-४ ■ वर्ष-५ ■ अङ्क-२१९ | १ | जून ०१, २०२६ | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

२ हिमाचल Nagar Nigam Election Result २०२६:- मण्डी- सोलन- धर्मशाला- नगरेषु भाजपापक्षस्य विजयध्वजः, पालमपुरं काङ्ग्रेसपक्षस्य हस्ते

३ मण्डी नगरनिगमः - काङ्ग्रेस-दलस्य मतानि वर्धितानि, आसनानि च न्यूनीभूतानि

४ "अल्पं खाद्यम्, सम्यक् खाद्यम्, समुचितपरामर्शश्च" इति मन्त्रेण कृषकव्यय-न्यूनीकरणाय मृत्तिकास्वास्थ्यसंरक्षणाय च शासनस्य दृढसंकल्पः"

## भारत-शासनम् राष्ट्रस्य अमूल्य-रिक्थानां संरक्षणार्थं निरन्तरं प्रयतते - मन की बात



प्रधानमन्त्री श्रीनरेन्द्रमोदी मन की बात इति कार्यक्रमे गतरविवासरे राष्ट्रं सम्बोधितवान्, सः सद्य सम्पन्नायाः नीदरलैण्ड देशस्य यात्रायाः उल्लेखं कृत्वा अवदत् यत् तत्रत्यया शासनसंस्थया चोलकालीनाः ताम्रपट्टिकाः भारतदेशाय प्रत्यर्पिताः। आकाशवाण्याः मन की बात कार्यक्रमे श्रीमोदी अवोचत् यत् एतेन विश्वव्यापिनः तमिलसमुदायस्य मध्ये विशेषः उत्साहः वर्तते। सः अवदत् यत् एताः पट्टिकाः चोलसाम्राज्यस्य सामुद्रिकशक्तिं दक्षिण-पूर्व-एशियादेशैः सह तेषां सम्बन्धान् च प्रदर्शयन्ति। प्रधानमन्त्री अवदत् यत् भारत प्रशासनम् राष्ट्रस्य अमूल्यरिक्थानां संरक्षणार्थं निरन्तरं प्रयतते । सः प्रोक्तवान् यत् 'ज्ञानभारतम्' अभियानेन छत्तीसगढ-राज्यस्य मल्हार-क्षेत्रे षष्ठ-सप्तमयोः शताब्द्योः पाण्डुवंशस्य महर्षेः बलार्जुनस्य सम्बद्धाः दुर्लभाः तिस्रः ताम्रपट्टिकाः अपि प्राप्ताः।प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना देशवासिनः वर्तमाने भीषण-ग्रीष्मऋतौ अत्यधिकं सावधानतां धारयितुं प्रशासनेन प्रदत्तानां निर्देशानां पालनं च कर्तुं प्रार्थिताः। आकाशवाण्याः 'मन की बात' कार्यक्रमे सः जनान् पर्याप्त मात्रायां जलपानं कर्तुं तथा सूर्यतापात् रक्षणोपायान् स्वीकृत्य एव गृहात् बहिर्गन्तुं परामर्शम् अददत्।

प्रधानमन्त्री अवदत् यत् ग्रीष्मतापात् रक्षणं प्राप्तुं आमपन्नम्, तक्रम्, सत्तूपेयम्, बेलपन्नम्, पानकम्, नीरमोर्, सोलकढी चेत्यादीनां सेवनं हितकरम् अस्ति । सः उक्तवान् यत् एते पेयपदार्थाः 'एकभारत-श्रेष्ठभारत' इति भावनां प्रदर्शयन्ति तथा तेषु पूर्वजानाम् अनुभवः निहितः अस्ति । प्रधानमन्त्री रांची-नगरे आयोजितायाः राष्ट्रिय-वरिष्ठ-क्रीडासंघ-प्रतियोगितायाः अपि चर्चा अकरोत् । अस्यां प्रतियोगितायां प्रायः अष्टशताधिक क्रीडकाः भागं गृहीतवन्तः। श्रीमोदी गुरिंदर वीर सिंहः, विशाल टी. के., तेजस्विन शंकरः, देव मीणा, कुलदीप कुमारः चेत्येतेभ्यः अभिनन्दनम् अयच्छत् । असौ शतमीटरमितायां-धावनप्रतियोगितायां विजेतृभ्यां गुरिंदर वीर सिंहः, तथा अनिमेष कुजूर चेत्येताभ्यां सह अपि संवादम् अकरोत् । प्रधानमन्त्रिणा उक्तं यत् खगोलशास्त्र देशस्य प्रत्येकं जनेषु जिज्ञासां जनयति । तेन उक्तं यत् खगोलशास्त्र देशे शीघ्रं लोकप्रियं भवति । श्रीमोदी युवानः खगोलशास्त्रसमूहे सम्मिलितुं तथा अवकाशकालावधी तारामण्डलम् द्रष्टुं प्रेरितवान् ।प्रधानमन्त्री उत्तरप्रदेशस्य एकस्मिन् कुल्यां गङ्गाडॉल्फिन्-प्राणिनः रक्षणसम्बद्धस्य लघुचलच्चित्रस्य अपि उल्लेखं कृतवान्। तेन उक्तं यत् नमामि गङ्गे-अभियानस्य अन्तर्गतं निर्मिता भारतस्य प्रथमा गङ्गाडॉल्फिन्-उद्धार-एम्बुलेन्स् अस्मिन् कार्ये महत्त्वपूर्णां भूमिकां निर्वहति । श्रीमोदी अवदत् यत् गङ्गाडॉल्फिन्-संरक्षणेन नद्याः जैवविविधतायाः तथा अमूल्यायाः प्राकृतिकधरोहरायाः संरक्षणमपि भवति।

## सुभाषितम्

**परस्य पीडया लब्धं,**
**धर्मस्योल्लंघेन च।**
**आत्मावमानसंप्राप्तं,**
**न धनं तत् सुखाय वै॥**

भावार्थः- जो धन किसी को पीड़ा पहुँचाकर, धर्म का उल्लंघन करके तथा स्वयं को अपमानित करवाकर प्राप्त किया गया हो, वह धन कदापि सुख नहीं प्रदान करता।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## चिन्तने कर्मणि च नवोन्मेषः सैन्यसामर्थ्यानां विकासं त्वरितं करिष्यति- रक्षाध्यक्षः लेफ्टिनेण्ट् जनरल् एन. एस. राजा सुब्रमणिः



नूतनः (सीडीएस्) इति प्रमुखः रक्षाध्यक्षः लेफ्टिनेण्ट् जनरल् एन. एस्. राजा सुब्रमणिः उक्तवान् यत् चिन्तने कर्मणि च नवोन्मेषः सैन्यसामर्थ्यानां विकासं त्वरितं करिष्यति। देशस्य नूतनस्य प्रमुख-रक्षाध्यक्षस्य पदं स्वीकृत्य वार्ताहरैः सह संवादे जनरल् सुब्रमणिः अवदत् यत् सशस्त्रबलानि राष्ट्रहितसंरक्षणे निरन्तरं व्यावसायिकं कार्यसञ्चालनसम्बद्धं निर्णायकं च प्रदर्शनं विहितवन्तः । ते भारतस्य सार्वभौमत्वस्य प्रादेशिक अखण्डतायाश्च रक्षणाय दृढसंकल्पाः सन्ति। अद्य प्रातः नवदिल्लीस्थे साउथ् ब्लॉक् प्राङ्गणे प्रमुखाय रक्षाध्यक्षाय गार्ड ऑफ ऑनर् इति सम्मानः प्रदत्तः। तेन राष्ट्रीय-युद्ध-स्मारके पुष्पाञ्जलिरपि समर्पिता।

## केन्द्रीयमाध्यमिकशिक्षापरिषद स्वस्य सेवाप्रदातुः ऑनमार्क-पोर्टल इत्यस्यान्तर्गतान् दोषान् सावधानतया निरीक्षणं करोति

केन्द्रीयमाध्यमिकशिक्षापरिषदा उक्तं यत् स्वस्य सेवाप्रदातुः ऑनमार्क-पोर्टल इत्यस्यान्तर्गताः ये दोषाः अधुना सार्वजनिकरूपेण आगताः, तेषां विषये सा सावधानतया निरीक्षणं करोति। सामाजिकमाध्यमेषु प्रकाशिते सन्देशे सीबीएसई उक्तवान् यत् विविध-सर्वकारीयसंस्थानानां तथा भारतीयप्रौद्योगिकीसंस्थानानाम् साइबर-सुरक्षाविशेषज्ञानां दलम् गतदिनेषु एतासां प्रणालीनां सुदृढीकरणाय तथा तंत्राशं सुरक्षितुं नियुक्तम् अस्ति। सीबीएसई अपि सूचितवान् यत् अभिज्ञाताः दोषाः नियन्त्रणाधीनाः कृताः, सहैव अन्यासां सम्भावितानां त्रुटीनां निवारणार्थं गम्भीरा समीक्षा क्रियते।

## एडमिरल् कृष्णस्वामिनाथन् नौसेनायाः सप्तविंशति-तमेन प्रमुखत्वेन पदभारं स्वीकृतवान्



एडमिरल् कृष्णस्वामिनाथन् नौसेनायाः सप्तविंशति-तमेन प्रमुखत्वेन पदभारं स्वीकृतवान्। असौ एड्मिरल् दिनेश-के. त्रिपाठी इत्यस्य उत्तराधिकारी अभवत्। एड्मिरल् स्वामीनाथेन उक्तं यत् नौसेना समाह्वानपूर्ण, जटिले, अनिश्चिते च वातावरणे सक्रियरूपेण कार्यं कर्तुं प्रवृत्ता अस्ति । सः अवदत् यत् नौसेनायाः आधुनिकीकरणं क्रियते येन उच्चतम स्तरस्य युद्धक्षमता सुसज्जिता भविष्यति। अस्मिन् अवसरे निवर्तमानः नौसेनाप्रमुखः एड्मिरल् दिनेश के. त्रिपाठी देशस्य नौसेनायाः नेतृत्वं गौरवपूर्णम् अभवत् इति अवदत्। सः प्रोक्तवान् यत् पश्चिम एशियायाः वर्तमानस्थितेः मध्ये भारतीयनौसेनायाः प्रतिबद्धता, व्यावसायिकता च अक्षुण्णा एव स्तः ।

## अमरीका-ईरानेन सह परमाणु-सन्धेः सन्निकटः वर्तते- राष्ट्रपतिः डॉनल्ड ट्रम्पः



अमेरिकायाः राष्ट्रपतिः डॉनल्ड ट्रम्पः अवोचत् यत् अमरीका-ईरानेन सह परमाणु-सन्धेः सन्निकटः वर्तते। तथापि तेन सङ्केतितं यत् यदि संवादो विफलः भवेत् चेत् सैन्य-कार्याचरणस्य विकल्पः अपि तत्परः स्यात् । श्रीमता ट्रम्पेण उक्तं यत् ईरानाय कदापि परमाण्वस्त्र-निर्माणानुमतिः नैव प्रदास्यते। तेनाश्वासितं यत् सन्धिः जाते सति होर्मुज जलडमरूमध्य इत्येतत् शीघ्रम् उद्घाटयिष्यते।

# हिमाचल Nagar Nigam Election Result २०२६:- मण्डी- सोलन- धर्मशाला- नगरेषु भाजपापक्षस्य विजयध्वजः, पालमपुरं काङ्ग्रेसपक्षस्य हस्ते




**हिमसंस्कृतवार्ताः- शिमला।** रविवासरे प्रातः आरब्धायां मतगणनायां मध्याह्नपर्यन्तं सर्वे परिणामाः घोषिताः। चतुर्णां नगरनिगमानां त्रिषष्टिः (६३) वार्डक्षेत्रेषु काङ्ग्रेसपक्षेण सप्तत्रिंशत् (३७), भाजपापक्षेण त्रयोविंशतिः (२३), त्रिषु स्थानेषु निर्दलीय- प्रत्याशिभिः विजयः प्राप्तः। तथापि नगरनिगमानां दृष्ट्या भाजपापक्षेण त्रिषु निगमेषु सत्तां प्राप्य काङ्ग्रेसपक्षाय महान् आघातः दत्तः।

## मण्डी, धर्मशाला च सोलनम्-

नगरनिगममण्ड्यां भाजपापक्षेण अत्यन्तं प्रभावशालिप्रदर्शनं कुर्वता चतुर्दशसु (१४) द्वादश (१२) वार्डक्षेत्रेषु आधिपत्यं स्थापितम्। अत्र काङ्ग्रेसपक्षाय एकस्मै निर्दलीयप्रत्याशिने च एकैकं स्थानं प्राप्तम्। मण्डीनगरनिगमे पूर्वमपि भाजपापक्षस्य वर्चस्वम् आसीत्, अस्मिन् वारे च दलेन तत् अधिकं सुदृढं कृतम्। निर्वाचनपरिणामानन्तरं भाजपाकार्यकर्तारः नगरे उत्सवम् अमानयन्, एतत् च राज्यसर्वकारस्य नीतीनां उपरि जनतायाः मुद्रा (स्वीकृतिः) इति अकथयन्।
धर्मशालानगरनिगमे अपि भाजपापक्षेण काङ्ग्रेसपक्षात् सत्तां छित्त्वा सप्तदशसु (१७) एकादश (११) आसनानि विजितानि। काङ्ग्रेसपक्षाय पञ्चभिः आसनैः एव सन्तोषः करणीयः अभवत्, यदा तु एकं स्थानं निर्दलीयप्रत्याशिनः खाते गतम्। धर्मशालायां भाजपापक्षस्य विजयः सङ्घटनस्य रणनीतेः स्थानीयमुद्देषु च जनसमर्थनस्य परिणामः मन्यते। सोलननगरनिगमे भाजपापक्षेण दश (१०) आसनानि जित्वा स्पष्टं बहुमतं प्राप्तम्। अत्र काङ्ग्रेसपक्षाय षट् (६) आसनानि प्राप्तानि, यदा तु एकस्मिन् वार्डक्षेत्रे निर्दलीयप्रत्याशी विजयी अभवत्। सोलननगरे काङ्ग्रेसपक्षस्य सत्तासंरक्षणस्य आशा आसीत्, परन्तु भाजपापक्षेण निर्वाचनप्रचारकाले स्थानीयमुद्दान् विकासकार्याणि च प्रमुखतया उत्थाप्य अग्रसरत्वं प्राप्तम्।

## पालमपुरे काङ्ग्रेसस्य विजयः-

अपरपक्षे, पालमपुरनगरनिगमः काङ्ग्रेसपक्षाय आश्वासं आनयत्। अत्र काङ्ग्रेसपक्षेण पञ्चदशसु (१५) एकादश (११) आसनेषु विजयं प्राप्य भाजपापक्षः चतुर्षु आसनेषु एव सीमितः कृतः। पालमपुरे काङ्ग्रेसपक्षेण स्थानीयनेतृत्वस्य सङ्घटनस्य च दृढतायाः बलेन भाजपापक्षः पृष्ठतः त्यक्तः। चतुर्षु नगरनिगमेषु प्रातः नववादने मतगणना आरब्धा, मध्याह्ने द्वादशवादनपर्यन्तं प्रायः सर्वे परिणामाः स्पष्टाः अभवन्। प्रशासनेन मतगणनाकेन्द्रेषु सुरक्षायाः व्यापकाः प्रबन्धाः कृताः आसन्। राजनीतिकदृष्ट्या एते निर्वाचनपरिणामाः अतीव प्रमुखाः मन्यन्ते, यतोहि मण्डीं विहाय अन्येषु त्रिषु नगरनिगमेषु पूर्वं काङ्ग्रेसपक्षस्य वर्चस्वं मन्यते स्म। ईदृशे समये भाजपापक्षस्य एषः विजयः आगामिनां निर्वाचनानां कृते दलस्य उत्साहं वर्धयिष्यति।

## जनतया काङ्ग्रेसः तिरस्कृतः, भाजपा- पक्षाय प्राप्तः जनादेशः - बिन्दलः

भाजपाप्रदेशाध्यक्षः राजीवबिन्दलः अवदत् यत् हिमाचलप्रदेशे सम्पन्नेषु पञ्चायतीराज- नगरनिकाय- नगरनिगमनिर्वाचनेषु जनतया काङ्ग्रेससर्वकारः पूर्णतया तिरस्कृतः। तेन दावा कृता यत् एतेषां निर्वाचनानां परिणामैः भाजपापक्षस्य पक्षे स्पष्टः जनादेशः दत्तः। बिन्दलानुसारम्, एते निर्वाचनाः काङ्ग्रेसपक्षस्य जनविरोधिनीतीनां विरुद्धं जनमतसङ्ग्रहः इव सिद्धाः अभवन्। रविवासरे शिमलानगरे पत्रकारवार्तां कुर्वन् बिन्दलः अवदत् यत् नगरनिकायनिर्वाचनेषु भाजपा समर्थितप्रत्याशिभिः श्रेष्ठं प्रदर्शनं कृतम्। भाजपापक्षेण स्वसमर्थितप्रत्यासिनां सूची प्रसारिता आसीत्, परन्तु काङ्ग्रेसपक्षः एतादृशं कर्तुं न अशक्नोत्। तेन मुख्यमन्त्रिणः सुखविन्द्रसिंहसुक्खू महोदयस्य 'पंचसप्ततिप्रतिशतं (७५%) निकायाः विजिताः' इति दावा राजनीतिकं असत्यं जनतां भ्रमितुं प्रयासः च इति कथितम्। बिन्दलः आरोपं कृतवान् यत् काङ्ग्रेससर्वकारः जनतायाः जनादेशस्य अपमानं करोति। नगरपरिषदां परिणामानां अनन्तरं सर्वकारेण जानन् बुध्यन् अधिसूचनाः रोधिताः। एतस्मात् कारणात् भाजपापक्षाय न्यायालयस्य द्वारं खटखटनीयं अभवत्। न्यायालये प्रसरिते सति सर्वकारः बाध्यः भूत्वा अधिसूचनाः प्रसारितवान्। बिन्दलः अवदत् यत् काङ्ग्रेससर्वकारेण अध्यक्ष- उपाध्यक्षनिर्वाचनसम्बन्धिषु नियमेषु परिवर्तनानि कृतानि। तेन आरोपं कृतं यत् एतेन क्रय-विक्रयणस्य (हॉर्स ट्रेडिंग) मार्गं उद्घाटयितुं यत्नः कृतः। पूर्वं निश्चितसमयसीमायां निर्वाचनं कारयितुं प्रावधानम् आसीत्। इदानीम् अधिकारिभ्यः स्वेच्छया उपवेशनम् आह्वातुम् अधिकारं दत्त्वा हॉर्स ट्रेडिंग इत्यस्य सम्भावनाः वर्धिताः। बिन्दलः एतत् जनतायाः जनादेशेन सह विश्वासघातः इति अवदत्। तेन दावा कृता यत् प्रदेशस्य ३१५९ पञ्चायतेषु प्रायः चतुःसप्ततिप्रतिशतं (७४%) प्रमुखाः (प्रधान) सप्ततिप्रतिशतं (७०%) उपप्रमुखाः (उपप्रधान) च भाजपा समर्थिताः प्रत्याशिनः विजयिनः अभवन्। तेन कथितं यत् मण्डीनगरनिगमे भाजपापक्षेण १४ मध्ये १२ आसनानि विजितानि, काङ्ग्रेसपक्षः च एकेन आसनेन सीमितः कृतः। धर्मशालायां सोलननगरे च अपि भाजपापक्षेण दश-दश आसनानि प्राप्तानि। चतुर्षु त्रिषु नगरनिगमेषु भाजपापक्षस्य स्पष्टं प्राधान्यं प्रदेशे परिवर्तनस्य सङ्केतः अस्ति। बिन्दलः आरोपम् अकरोत् यत् काङ्ग्रेससर्वकारेण महिलाभ्यः, युवभ्यः, कृषकेभ्यः, कर्मचारिभ्यः च कृताः प्रतिश्रुताः (वादे) न पूरिताः। प्रदेशे विकासकार्याणि अवरुद्धानि सन्ति। सर्वकारः संस्थाः, विद्यालयान्, कार्यालयान् च पिधातुं व्यस्तः अस्ति। जनतया एतेषां निर्वाचनानां माध्यमेन काङ्ग्रेसस्य असत्यं कुशासनं च अस्वीकृत्य प्रधानामन्त्रिणः नरेन्द्रमोदिनः नीतिषु विश्वासः प्रकटितः। भाजपा लोकतन्त्रस्य जनादेशस्य च रक्षायै सर्वस्तरे सङ्घर्षं करिष्यति।

## हिमाचले भाजपायाः प्रचण्डविजयः, त्रिषु नगरनिगमेषु पूर्णबहुमतम्- सौदानः



भाजपायाः राष्ट्रियोपाध्यक्षः प्रदेशस्य क्षेत्रीयप्रभारी च सौदानसिंहः नगरनिगम-निर्वाचनेषु दलस्य एतस्यां ऐतिहासिक्यां विजयायां प्रदेशस्य जनतां, दलस्य नेतृत्वं, समर्पितकार्यकर्तृन् च हार्दिकं अभिनन्दनं शुभकामनाः च ज्ञापितवान्। सौदानसिंहः अवदत् यत् हिमाचलप्रदेशस्य चतुर्षु नगर-निगमेषु अभूतेषु निर्वाचनेषु भाजपापक्षेण कुल त्रिषष्टि (६३) वार्ड-क्षेत्रेषु सप्तत्रिंशत् (३७) स्थानेषु विजयं प्राप्य एकोनषष्टिप्रतिशतं (५९%) साफलता अवाप्ता। भाजपापक्षेण मण्डी, धर्मशाला, सोलननगरनिगमेषु पूर्णबहुमतं प्राप्य अपूर्वा विजयः अवाप्ता। **मण्डी-** भाजपापक्षेण १४ मध्ये १२ आसनानि जित्वा षडशीतिप्रतिशतं (८६%) साफलता प्राप्ता। **धर्मशाला-** १७ मध्ये ११ आसनानि जित्वा स्पष्टं बहुमतं लब्धम्। **सोलनम्-** १७ मध्ये १० आसनेषु विजयं प्राप्य जनतायाः विश्वासः अर्जितः। तेन अन्ततः कथितं यत् अयं परिणामः हिमाचलप्रदेशस्य जनतायाः अन्तर्मनस्य ध्वनिः अस्ति।

## मण्डीजनपदस्य जनतया पुनः जनादेशं दत्त्वा काङ्ग्रेसपक्षाय दृढोत्तरं प्रदत्तम्- जयरामठाकुरः



**हिमसंस्कृतवार्ताः- मण्डी।** पूर्वमुख्यमन्त्री विपक्षस्य नेता च जयरामठाकुरः कथयति यत् मण्डी मण्डलं पूर्वमपि भाजपापक्षस्य आसीत्, इदानीमपि अस्ति, भविष्ये अपि स्थास्यति। एषा वार्ता तेन मण्ड्यां भाजपापक्षस्य नगरनिगमनिर्वाचनेषु महत्याः विजयस्य पश्चात् पत्रकाराय: सह सम्भाषणसमये उक्ता। जयरामठाकुरः काङ्ग्रेसपक्षं प्रति कटाक्षं कुर्वन् अवदत् यत् मण्ड्याः जनतया पुनः एकवारं स्पष्टः विशालश्च सन्देशः दत्तः यत् अत्रत्याः जनाः भाजपापक्षेण सह दृढतया शैलवत् (चट्टानवत्) तिष्ठन्ति। तेन उक्तं यत् भाजपापक्षेण सह मण्ड्याः बहुवर्षीयः पुरातनः सम्बन्धः अस्ति, अयं जनादेशः च तस्मिन् विश्वासे एव अङ्किता मुद्रा (मोहर) अस्ति। जयरामः अवदत् यत् यदा यदा सः कथयति यत् मण्डी भाजपापक्षस्य अस्ति, तदा केषाञ्चित् जनानां एतस्मिन् आपत्तिः भवितुम् आरभते। यः जनादेशः आगतः, सः तादृशानां जनानां कृते स्पष्टः सन्देशः अस्ति। भाजपापक्षः जनतायाः विश्वासे योग्यः भवितुम् पूर्णप्रतिबद्धतया कार्यं कृतवान्, अग्रे अपि करिष्यति। जयरामठाकुरः अवदत् यत् नगरनिकायनिर्वाचनेषु अपि भाजपापक्षाय सम्पूर्णे प्रदेशे महती विजयः प्राप्ता। अपरपक्षे, पञ्चायत्तनिर्वाचनेषु अपि सम्पूर्णे प्रदेशे सप्ततिप्रतिशतं (७०%) प्रतिनिधयः भाजपा समर्थिताः विजयिनः अभवन्। तेन उक्तं यत् काङ्ग्रेसपक्षः पुनः पुनः असत्यान् आक्षेपान् करोति यतोहि एते निर्वाचनाः दलचिह्नेन न अभवन्। इदानीं ये निर्वाचनाः दलचिह्नेन अभवन्, तेषु अपि जनतया काङ्ग्रेसपक्षः पूर्णतया तिरस्कृतः। जयरामठाकुरः अस्मै जनादेशाय मण्ड्या सहितस्य सम्पूर्णप्रदेशस्य जनतायाः प्रति कृतज्ञतां ज्ञापितवान्। जयरामठाकुरः जिलापरिषदः बीडीसी (BDC) निर्वाचनेषु अपि भाजपापक्षाय विपुलं जनसमर्थनम् अलब्ध इति दावा कृतवान्।

# मण्डी नगरनिगमः - काङ्ग्रेस-दलस्य मतानि वर्धितानि, आसनानि च न्यूनीभूतानि

हिमसंस्कृतवार्ताः - मण्डी। मण्डी-नगरनिगमनिर्वाचने काङ्ग्रेस-दलस्य मतकोषे (वोट बैंक) केषुचित् वार्डेषु अप्रत्याशिता वृद्धिः तु अभवत्, किन्तु आसनानि पूर्वतुलनया न्यूनानि अभवन्। पुरातनमण्ड्याम् (पुरानी मंडी) काङ्ग्रेस-दलस्य मतकोषे १३३ प्रतिशततः अधिका वृद्धिः जाते सत्यपि प्रत्याशिनः पराजयः एव अभवत्। मण्डी-नगरनिगमे कृतात् मतदानात् परं काङ्ग्रेस-दलम् एषः अधिकारः करोति यत् तेषां मतकोषे वृद्धिः संजाता, एषा च मण्ड्यां काङ्ग्रेस-दलस्य कृते शुभसङ्केतः अस्ति। निगमनिर्वाचनेषु काङ्ग्रेस-दलस्य मतकोषे उल्लेखनीयः आरोहावरोहः दृष्टः। २०२२ तमस्य वर्षस्य निर्वाचनस्य तुलनायां २०२६ तमे वर्षे दलेन अनेकेषु वार्डेषु सुन्दराणि मतानि प्राप्तानि, तथापि विजयः न प्राप्तः। अस्मिन् अन्तराले केषुचित् वार्डेषु काङ्ग्रेस-दलस्य मतकोषे महान् ह्रासः अपि पञ्जीकृतः। काङ्ग्रेस-दलस्य पूर्वजनपदाध्यक्षः दीपकशर्मा विश्वासं करोति यत् २०२२ तमस्य वर्षस्य विधानसभानिर्वाचनेषु काङ्ग्रेस-दलेन प्राप्तानां मतानां तुलनायां मण्डी-नगरनिगमनिर्वाचने २०२६ तमे वर्षे काङ्ग्रेस-दलस्य मतकोषे उल्लेखनीया वृद्धिः दृष्टा। नगरनिगमस्य बहुषु वार्डेषु काङ्ग्रेस-दलाय पूर्वमपेक्ष्य अधिकं जनसमर्थनम् अलभत, यत् एतद् दर्शयति यत् मण्ड्याः जनतायाः विश्वासः काङ्ग्रेस-नीतिषु तथा च मुख्यमन्त्रिणः सुक्खू-महोदयस्य नेतृत्वे प्रदेशसर्वकारस्य कार्येषु निरन्तरं सुदृढः अभवत्।

## पालमपुर नगरनिगमः - काङ्ग्रेस-दुर्गं भेत्तुं न शक्तं भाजपा-दलम्

हिमसंस्कृतवार्ताः — पालमपुरम्।पालमपुर-क्षेत्रे विधायकस्य आशीषबुटेलस्य काङ्ग्रेस-दलस्य च प्रभावः यथावत् अस्ति। प्रदेशस्य अन्येषु नगरनिगमेषु यत्र काङ्ग्रेस-दलस्य प्रदर्शनं निराशाजनकम् आसीत्, तत्रैव पालमपुर-नगरनिगमे १५ वार्डेषु ११ वार्डेषु विजयेन सह काङ्ग्रेस-दलेन निरन्तरं द्वितीयवारं निगमे आधिपत्यं स्थापितम्। पालमपुर-नगरनिगमे काङ्ग्रेस-दलेन भाजपा-दलाय घोरा पराजयः दत्ता। यद्यपि अस्मिन् वारे भाजपा-दलम् गतवारस्य द्वयोः आसनयोः तुलनायां चत्वारि आसनानि जेतुं सफलं जातम्, किन्तु नगरनिगमे वर्चस्वस्थापनस्य तस्य स्वप्नं पूर्णं नाभवत्। पालमपुरे काङ्ग्रेस-दलस्य विधायकस्य आशीषबुटेलस्य च प्रभावः शिरसि आरुह्य अवदत् , काङ्ग्रेस-दलेना भाजपा-दलं पालमपुरे नूतनविचाराय विवशं कृतम्। पालमपुरे नगरनिगमनिर्वाचनेषु भाजपा-दलस्य अनेकैः दिग्गजनेतृभिः सह पूर्वमुख्यमन्त्रिणा शान्ताकुमारेणापि जनता भाजपा-पक्षे मतदानार्थं आहुता आसीत्, किन्तु जनतया एतत् न स्वीकृतम्। नगरनिगमनिर्वाचनात् परमेव द्वाभ्यां दलाभ्यां दशभ्यः अधिकानि आसनानि जेतुं अधिकाराः क्रियन्ते स्म, परिणामैश्च काङ्ग्रेस-दलस्य अधिकाराः सुदृढाः सिद्धाः। एतानि निर्वाचनानि विधानसभानिर्वाचनानां उपान्त्यचरणम् (सेमीफाइनल) इति मन्यन्ते स्म, ईदृशे समये काङ्ग्रेस-दलम् उपान्त्यचरणे विजयेन सह अग्रे वर्धितम्।

## सोलन नगरनिगमः - सोलन-नगरे भग्नं काङ्ग्रेस-दलस्य स्वप्नम्

हिमसंस्कृतवार्ताः - सोलनम्। सोलन-नगरनिगमे भाजपा-दलस्य विजयकमलं विकसितम्। १७ वार्डयुक्ते निगमे कुलाहत्य दशसु वार्डेषु भाजपा-प्रत्याशिनः विजयध्वजं तोलयित्वा सत्तारूढस्य काङ्ग्रेस-दलस्य द्वितीयवारं महापौर-उपमहापौरपदयोः अधिकारकरणस्य स्वप्नं धराशायि कृतवन्तः। अस्य निर्वाचनस्य परिणामात् परं सुदीर्घकालात् सोलन-निर्वाचनक्षेत्रस्य सत्तासुखं भुञ्जानस्य विधायकस्य मन्त्रिणः च डा. धनीरामशाण्डिलस्य तस्य परिवारस्य च कृते अपि सङ्कटघण्टिका वादिता। नगरनिगमनिर्वचनस्य परिणामैः एतत् स्पष्टं जातं यत् सोलन-नगरस्य स्थानीयविषयेषु काङ्ग्रेस-दिग्गजाः पराजिताः। पेयजलसमस्या, अवकरस्य (कूड़े के) बिलेषु अपकर्षः, गृहकरे (हाउस टैक्स) न्यूनीकरणं च अन्यान् यान् विषयान् आधारं कृत्वा काङ्ग्रेस-दलम् गतनिर्वाचने सोलन-नगरनिगमस्य सत्तासिंहासने विराजमानम् अभवत्, तेषामेव पूरणाभावात् जनतायाः न्यायालयेन अस्मिन् वारे ते पातिताः। स्थानीयविषयान् अतिरिच्य काङ्ग्रेस-दलस्य गते विधानसभानिर्वाचने महिलाभ्यः प्रतिमासं १५०० रूप्यकाणां दानम्, ओ.पी.एस. (OPS), कर्मचारिणां पेन्शनभोक्तृणां च देयराशेः भुक्तिविलम्बः इत्यादिभिः विषयैः अपि अग्नौ घृतस्य कार्यं कृतम्। प्रदेशस्य चत्वारः मन्त्रिणः अपि क्षतिनियन्त्रणं (डैमेज कंट्रोल) कर्तुं न शक्नुवन्।

## धर्मशाला नगरनिगमः - गगनात् भूमौ पतिताः अनेके शूराः

हिमसंस्कृतवार्ताः — धर्मशाला। धर्मशाला-नगरनिगमनिर्वाचने भाजपा-दलेन प्रचण्डः विजयः पञ्जीकृतः। १७ वार्डेषु ११ वार्डेषु भाजपा-प्रत्याशिनः विजयशृङ्खलां प्राप्वन्तः, तत्रैव काङ्ग्रेस-दलस्य केवलं पञ्च पार्षदाः एव जेतुं शक्नुवन्। एतेन सह एकः निर्दलीयप्रत्याशी अपि विजयी अभवत्। नगरनिगमनिर्वाचने द्वौ पूर्वमहापौरौ एकः उपमहापौरश्च पराजयस्य सम्मुखीनौ अभवताम्, अपरपक्षे निगमस्य नवमवार्डस्य 'सकोह' इत्यस्य जनतया तृतीयवारं पुनः इतिहासः आवर्तितः। नगरनिगमधर्मशालायाः सद्यः प्राप्तैः निर्वाचनपरिणामैः अस्मिन् वारे राजनीतेः अनेके प्रभाविनः शूराःगगनात् (अर्श से) भूमौ (फर्श पर) आनीताः। सत्तापटले सुदीर्घकालात् स्थितान् प्रायः अर्धदर्जनमित प्रभाविनेतृन् अस्मिन् वारे जनैः अस्वीकृत्य पराजयस्य स्वादः स्वादितः। अस्मिन् निर्वाचने सर्वतः महती क्षतिः तेषां पूर्वमहापौराणां उपमहापौराणां च अभवत्, ये स्व-स्ववार्डेषु अजेयाः मन्यन्ते स्म। दलात् विद्रोहः, पत्रकर्तनं (टिकट कटना) तथा च स्वतन्त्रप्रत्याशिरूपेण निर्वाचनक्षेत्रे अवतरणस्य भावः अस्मिन् वारे दिग्गजेष्वेव बृहद् अभवत्, येन धर्मशाला-नगरनिगमस्य निर्वाचनचित्रं पूर्णतः परिवर्तितम्। सर्वशः, धर्मशालायाः एतैः निर्वाचनपरिणामैः स्पष्टं कृतं यत् जनता अधुना वदनानां (चेहरों के) स्थाने कार्याय समीकरणाय च महत्त्वं ददाति।

## मुम्बईस्थिते द्वारकादास- जीवनलाल- साङ्ग्वी- अभियान्त्रिकी- महाविद्यालये द्वात्रिंशत्- वार्षिकोत्सवः



**हिमसंस्कृतवार्ताः:- मुंबई।** मुम्बईस्थिते द्वारकादास- जीवनलाल- साङ्ग्वी- अभियान्त्रिकी- महाविद्यालये द्वात्रिंशत्- वार्षिकोत्सवः समारम्भेण सम्पन्नः। अस्मिन् विशेषावसरे डा. ए. एस. प्रसादः, वर्टिव-इण्डिया- संस्थायाः उपाध्यक्षः तथा IIT-बॉम्बे-सम्बद्धस्य "सहस्रमुखेषु संस्कृतम्" अभियानस्य समर्थकः, "विकसितभारतम्" इति विषये प्रेरणादायिनीं व्याख्यानमालां प्रदत्तवान्। षट्शताधिकानां छात्राणाम् अध्यापकानां च समक्षं भाषमाणः डॉ. प्रसादमहोदयः आगामिषु पञ्चविंशतिवर्षेषु भारतस्य विकसितराष्ट्रत्वप्राप्तेः मार्गं विस्तरेण विवृणोति स्म। एषः कार्यक्रमः महाविद्यालयस्य Transformation Circle Club इत्यस्य आयोजनत्वेन सम्पन्नः।कार्यक्रमे महाविद्यालयस्य प्राचार्यः डॉ. हरि वासुदेवन् अपि उपस्थितः आसीत्। तेन अतिथेः सत्कारः कृतः। स्वीये भाषणे डॉ. प्रसादमहोदयः अवदत् यत् भारतस्य आर्थिकविकासे युवजनानां भूमिका अत्यन्तं महत्त्वपूर्णा अस्ति। देशस्य निरन्तरं दशप्रतिशतात्मकं सकलघरेलुत्पादनवृद्धिदरं साधयितुं युवशक्तेः योगदानम् अनिवार्यमिति तेन प्रतिपादितम्।अग्रगण्यप्रौद्योगिकी, डिजिटलाधारसंरचना, नवोन्मेषः, अभियान्त्रिककौशलविकासः भारतस्य प्रगतये आवश्यकाः इति तेन निरूपितम्। भारतीयज्ञानपरम्परायाः महत्त्वं प्रकाशयन् सः संस्कृतभाषायाः वैज्ञानिकसंरचनां विशदीकृतवान्। भाषायाः संरक्षणं, संवर्धनं च राष्ट्रनिर्माणस्य महत्त्वपूर्णाङ्गम् इति अपि तेन प्रतिपादितम्।अन्ते सः अभियान्त्रिकी-छात्रान् आह्वयत् यत् ते स्वकौशलं राष्ट्रस्य मूलभूतसमस्यानां समाधानाय विनियुञ्जीरन्, भारतस्य वैश्विक- आर्थिक- प्रौद्योगिक- उन्नतौ सक्रियं योगदानं दद्युः।एषा व्याख्यानमाला छात्रैः अध्यापकैः च सम्यक् प्रशंसिता तथा च समाजोपयोगिनः भविष्यत्सज्जान् अभियन्तॄन् निर्मातुं महाविद्यालयस्य प्रतिबद्धतां पुनः प्रतिपादितवती।

## संस्कृतस्य उपयोगः केवलं पूजा-पाठयोः न भवेत्, अपितु जनभाषारूपेणापि भवेत्-डॉ. ए. एस. प्रसाद



"वाग्विकासिनी" इति द्विदिवसीया संस्कृतकार्यशाला ९ तथा १० मे दिनयोः संस्कृताध्ययनकेन्द्रम्, IIT Bombay संस्थया "सहस्रमुखेषु संस्कृतम्" अभियानस्य अन्तर्गतं सफलतया आयोजिता। अस्याः कार्यशालायाः उद्देशः सरलरीत्या संस्कृतसंभाषणं शिक्षयितुम् आसीत्। कार्यशालायां सरलसंवादाः, व्याकरणस्य उपायाः, भाषाक्रीडाः, विविधाः क्रियाकलापाश्च आयोजिताः।उद्घाटनभाषणं सन्दीपमिश्रमहोदयेन कृतम्। प्रशिक्षणसत्राणि वाई. कुमारस्वामिमहोदयेन, यः पवईप्रदेशे संभाषणसंस्कृतस्य अग्रणी अस्ति, तथा प्रणवगोगटे महोदयेन, संस्कृताध्ययनकेन्द्रम्, IIT Bombay संस्थायाः प्रशिक्षकेन तथा SP Sanskrit Studio इत्यस्य संस्थापकानाम् अन्यतमेन, सञ्चालितानि। ताभ्यां सहभागिनः सरलया पद्धत्या संस्कृतसंभाषणं पठितवन्तः। सहभागिनः कार्यशालां बहु प्रशंसितवन्तः तथा भविष्ये अपि एतादृशकार्यक्रमेषु भागं ग्रहीतुम् इच्छां प्रकटितवन्तः।कार्यक्रमे सुमेधावर्या, SP Sanskrit Studio इत्यस्य संस्थापकानाम् अन्यतमा, संस्थायाः संस्कृतप्रेरितवस्तूनां परिचयं कारितवती। एषा संस्था "संस्कृतं धारयाम" इति भावनया संस्कृतस्य प्रचारं करोति।कार्यक्रमे डॉ. ए. एस. प्रसादमहोदयः अपि उपस्थितः आसीत्। तेन उक्तं यत् संस्कृतस्य उपयोगः केवलं पूजा-पाठयोः न भवेत्। युवजनाः संस्कृते विविधकार्याणि कुर्वन्तु इति अस्माकं प्रयत्नः अस्ति। संस्कृतम् आकर्षकं लोकप्रियं च कर्तुम् अपि अस्माकं उद्देश्यः अस्ति इति तेन उक्तम्। कार्यक्रमस्य अन्ते सर्वेभ्यः सहभागिभ्यः प्रमाणपत्राणि वितरितानि।

# बिहारराज्ये श्वः प्रभृति आरभ्यते ऐतिहासिकं "क्षेत्ररक्षण-अभियानम्"

## "अल्पं खाद्यम्, सम्यक् खाद्यम्, समुचितपरामर्शश्च" इति मन्त्रेण कृषकव्यय- न्यूनीकरणाय मृत्तिकास्वास्थ्यसंरक्षणाय च शासनस्य दृढसंकल्पः"

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्। बिहारराज्यस्य माननीयः कृषिमन्त्री विजयकुमारसिंहमहोदयः श्वः, १ जून २०२६ दिनाङ्के, समग्रबिहारराज्ये मासपर्यन्तं सञ्चाल्यमानस्य ऐतिहासिकस्य "क्षेत्ररक्षण- अभियानस्य" विधिवत् शुभारम्भं करिष्यति। जूनमासस्य त्रिंशद्दिनाङ्कपर्यन्तं प्रवर्तमानम् एतदभियानं ग्रामे ग्रामे, पञ्चायते पञ्चायते च जनचेतनारूपेण प्रसारयितुं कृषिविभागेन सर्वाः आवश्यकव्यवस्थाः सम्पन्नाः सन्ति। अभियानस्य पूर्वसन्ध्यायां कृषिमन्त्रीमहोदयेन उक्तं यत् भारतस्य यशस्विनः प्रधानमन्त्रीणः नरेन्द्रमोदी महोदयस्य संकल्पानुसारं, केन्द्रीयकृषिमन्त्रिणः शिवराजसिंहचौहानमहोदयस्य च दूरदर्शिन्या नीत्या प्रेरितम् एतदभियानं केवलं प्रशासकीयकार्यक्रमः न, अपि तु कृषकहिताय, भूमिसंरक्षणाय तथा ग्रामविकासाय समर्पितं महाजनान्दोलनं भविष्यति। तेनोक्तं यत् अभियानस्य मूलाधारः "अल्पं खाद्यम्, सम्यक् खाद्यम्, समुचितपरामर्शश्च" इति, येन रासायनिक- उर्वरकाणाम् असन्तुलितप्रयोगः निवारयितुं, कृषकाणाम् उत्पादनव्ययः न्यूनीकर्तुं, भूमेः उर्वराशक्तिं च संवर्धयितुं शक्यते। अस्य अभियानस्य अन्तर्गतं राज्यव्यापी- मृत्तिकापरीक्षणकार्यक्रमेषु विशेषबलः प्रदास्यते। कृषकाः मृत्तिकास्वास्थ्यपत्रस्य अनुशंसानुसारमेव उर्वरकप्रयोगाय प्रेरयिष्यन्ते। हरितखादस्य, जैविककृषेः, जैवोत्पादानां च प्रयोगः प्रोत्साहयिष्यते। जलवायुपरिवर्तनस्य वर्तमानपरिप्रेक्ष्ये कृषिवैज्ञानिकाः प्रत्यक्षं क्षेत्रेषु गत्वा कृषकेभ्यः व्यावहारिकमार्गदर्शनं दास्यन्ति। अल्पजलोपयोगिनीनां सस्यानां कृषिः, सस्यवैविध्यं, जोखिमप्रबन्धनस्य आधुनिकोपायाश्च प्रत्यक्षरूपेण अवबोधयिष्यन्ते। ग्रामात् आरभ्य राज्यस्तरपर्यन्तं त्रिस्तरीय-समन्वयव्यवस्था सुदृढीकृता अस्ति। कृषिमन्त्रिणा सांसदेभ्यः, विधायकेभ्यः, मुखियेभ्यः तथा अन्येभ्यः जनप्रतिनिधिभ्यः ग्रामचौपालानां माध्यमेन अभियानस्य नेतृत्वं कर्तुम् आह्वानं कृतम्। अभियानकाले कृषक-ऋणपत्र-योजना (KCC), प्रधानमन्त्री- किसान- सम्माननिधि- योजना, राष्ट्रिय- दलहन- तिलहन-मिशन-योजना तथा कृषि-यन्त्रीकरण- योजनादीनां लाभाः पात्रकृषकेभ्यः ग्रामस्तरे एव सुलभरूपेण प्रदास्यन्ते। कृषिमन्त्रिणा सूचितं यत् बिहारस्य सर्वेषु जनपदेषु विशेषदलानां गठनं सम्पन्नम् अस्ति। एतेषु कृषिविज्ञानकेन्द्राणां (KVK), भारतीयकृषि-अनुसन्धानपरिषदः (ICAR) वैज्ञानिकाः, कृषिविभागस्य वरिष्ठाधिकारिणश्च समाविष्टाः सन्ति। येषु क्षेत्रेषु रासायनिक-उर्वरकाणां प्रयोगः सामान्यस्तरात् अधिकः दृश्यते, तेषु विशेष-बहुविषयक-वैज्ञानिकदलानि श्वः प्रभृति प्रत्यक्षरूपेण कार्यारम्भं करिष्यन्ति।

**अवसरेऽस्मिन् माननीयेन कृषिमन्त्रिणा उक्तम्-**

"क्षेत्रस्य संरक्षणमेव कृषकसमृद्धेः मूलाधारः। क्षेत्रं सुरक्षितं चेत् कृषकः समृद्धो भविष्यति, समृद्धः कृषकः आत्मनिर्भरबिहारस्य निर्माणे महत्त्वपूर्णां भूमिकां निर्वक्ष्यति। 'प्रयोगशालातः क्षेत्रपर्यन्तम्' इति संकल्पस्य साकारार्थं एषः अभियानः महत्त्वपूर्णं सोपानम् अस्ति। अतः मम सर्वेभ्यः कृषकभ्रातृभ्यः भगिनीभ्यश्च विनम्रः आग्रहः यत् ते एतस्मिन्नभियाने सक्रियतया सहभागिनः भूत्वा वैज्ञानिकपरामर्शान् स्वीकुर्वन्तु, उर्वरकव्ययं न्यूनीकुर्वन्तु, स्वभूमेः स्वास्थ्यं च संरक्षन्तु।"

–कृषिविभागः, बिहार-राज्य-शासनम्

## डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

# "मनोवस्था" {बोधकथा} {६४}

कश्चित् धनी पुरुषः गुरुं भोजनार्थं स्वगृहे निमन्त्रितवान्। किन्तु एकादश्या उपवासकारणेन गुरुः भोजनार्थं न गतवान्। किन्तु स्वस्य द्वौ शिष्यौ धनिकस्य गृहं प्रेषितवान्। यदा शिष्यौ प्रत्यागतौ तदा एकः शिष्यः दुःखितः अपरः शिष्यः प्रसन्नः च आसीत्। गुरुः आश्चर्यचकितः- सः पृष्टवान् किमर्थं त्वं दुःखी असि? धनिकेन भोजने पक्षपातं कृतं वा? शिष्यः उक्तवान्- न न आचार्य! धनिकः दक्षिणा दातुं भेदं कृतं किम्? शिष्यः अवदन्- न न आचार्य! धनिकेन आवाभ्यां द्वे रुप्यके दत्ते। तर्हि किमर्थं त्वं दुःखी असि? तदा शिष्यः उक्तवान्- सः व्यक्ति बहु धनवान् तर्हि मम चिन्तनं न्यूनातिन्यूनं दशरुप्यकाणि दक्षिणा दास्यति किन्तु तेन केवलं द्वे रुप्यके अददात्। एतस्मिन् कारणेन अहं दुःखी अस्मि।

आचार्यः अपरं शिष्यं पृष्टवान्– त्वं किमर्थं प्रसन्न असि? तदा शिष्यः अवदन्- अहं जानामि धनीव्यक्तिः महानकृपणः तर्हि तेन द्वे रुप्यकाणि दक्षिणा दत्तः। अहं चिन्तितवान् यत् सः केवलं पञ्चाशत् नाणकम् अदास्यत् किन्तु सः दक्षिणारूपेण द्वे रुप्यके दत्तवान्। अस्य कारणात् अहं प्रसन्न अस्मि।

अस्माकं मनसः स्थितिः अपि एतादृशी एव अस्ति। एतादृशाः घटनाः प्रतिदिनं जगति भवन्ति। किन्तु केचन जनाः सुखं प्राप्नुवन्ति केचन जनाः दुःखं च। किन्तु सुखम् अथवा दुःखम् अस्माकं मनःस्थितौ निर्भरं भवति। इच्छा सम्पूर्णा चेत् सुखम्, इच्छा अपूर्णा चेत् दुःखम्। इच्छा नास्ति चेत् आनन्दम्।

सुन्दराणि सन्ति मनुष्यस्य कर्माणि, संस्काराः विचाराः वाक् च। यस्य संस्काराः, कर्माणि, चारित्राणि, विचाराः सद् भवन्ति, उत्तमम् सन्ति सः एव सुन्दरः व्यक्तिः।

ॐॐॐॐॐ

## जनगणनाकार्ये सोत्साहं भागं गृह्णन्तु; मुख्यमन्त्री सुक्खू-महोदयस्य प्रदेशवासिभ्यः आग्रहः

हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः जनगणनानिदेशालयेन प्रदत्तस्य 'स्वगणना' (Self Enumeration) इति विकल्पस्य अधिकतमाय उपयोगाय आह्वानं कृतवान्। सः अवदत् यत् सामान्याः नागरिकाः १ जून तः १५ जून २०२६ पर्यन्तं स्वगणना-जालाधारे (पोर्टल) se.census.gov.in इत्यत्र गत्वा स्वविवरणं पञ्जीकर्तुं शक्नुवन्ति। तेन प्रतिपादितं यत् जनगणना अस्माकं लोकतन्त्रस्य विकासस्य च आधारशिल्पा (रीढ़) अस्ति तथा च एतत् तादृशं महत्त्वपूर्णं माध्यमं वर्तते, यस्य साहाय्येन अस्माकं जनसङ्ख्यायाः, परिवाराणां स्थितेः, आवासस्य, संसाधनानां नागरिकाणाम् उपलभ्यमानसुविधानां च ज्ञानं प्राप्यते।मुख्यमन्त्रिणा सुक्खू-महोदयेन उक्तं यत् हिमाचलप्रदेशे जनगणना द्वयोः चरणयोः भविष्यति, यस्मिन् प्रथमे चरणे १६ जून तः १५ जुलाई पर्यन्तं गृहसूचीकरणं गृहगणना च तथा द्वितीये चरणे जनसङ्ख्यायाः गणना करिष्यते। सः अवदत् यत् अस्मिन् वारे जनगणना अङ्कीय-माध्यमेन (डिजिटल मोड) भविष्यति, यस्मिन् प्रगणकाः (एन्यूमरेटर्स) पर्यवेक्षकाश्च स्वकीयचलदूरभाषस्य (मोबाइल) उपयोगं कृत्व गृहाणां परिवाराणां च सूचनाः सङ्ग्रहीष्यन्ति। तेन कथितं यत् हिमाचलप्रदेशस्य हिमाच्छादितेषु क्षेत्रेषु द्वितीयचरणस्य कार्यं ११ सितम्बर तः ३० सितम्बर २०२६ पर्यन्तं तथा च शिष्टेषु (शेष) क्षेत्रेषु ९ फरवरी २०२७ तः २८ फरवरी २०२७ पर्यन्तं सम्पादयिष्यते। मुख्यमन्त्रिणा प्रदेशवासिभ्यः संप्रार्थितं यत् ते अस्य राष्ट्रियमहत्त्वस्य कार्ये सोत्साहं भागं गृह्णन्तु तथा च प्रगणकेभ्यः, पर्यवेक्षकेभ्यः जनगणनासम्बद्धकर्मचारिभ्यश्च सत्यां पूर्णं च सूचनां ददतु। सः अवदत् यत् एतानि विवरणानि (आंकड़े) सर्वकाराय भविष्यस्य योजनानां नीतीनां च निर्माणे प्रमुखां भूमिकां वहन्ति।



## अनुरागः अवोचत्- नगरनिगमेषु भाजपा-दलस्य प्रचण्डविजयः; विफल-काङ्ग्रेससर्वकारस्य विरुद्धं स्पष्टः जनादेशः

हिमसंस्कृतवार्ताःहमीरपुरम्। पूर्वकेन्द्रीयमन्त्री तथा च हमीरपुर-संसदीयक्षेत्रस्य सांसदः अनुरागसिंहठाकुरः हिमाचलप्रदेशस्य चतुर्षु नगरनिगमेषु त्रिषु भाजपा-दलस्य प्रभाविविजये प्रदेशवासिभ्यः कृतज्ञतां ज्ञापितवान्। सः अवदत् यत् एषः परिणामः प्रदेशस्य विफलायाः काङ्ग्रेससर्वकारस्य विरुद्धं स्पष्टः जनादेशः अस्ति। श्रीठाकुरः प्रतिपादितवान् यत् प्रदेशे नगरनिगम-पञ्चायतीराजनिर्वाचनेषु भाजपा-दलस्य प्रचण्डविजयः प्रधानमन्त्रिणः नरेन्द्रमोदिनः भाजपा-दलस्य च राष्ट्रवादी-विकासवादीनीतिषु जनतायाः आस्थायाः प्रतीकः अस्ति। सः भाजपा-दलस्य सर्वान् विजयीप्रत्याशिनः प्रति शुभाशंसाः प्रकटितवान् तथा च एतेषु निर्वाचनेषु पूर्णसमर्पणेन कार्यं कृतवते भाजपा-हिमाचलप्रदेशस्य प्रत्येकस्मै कार्यकर्त्रे तथा च प्रदेशाध्यक्षाय राजीवबिन्दलाय वर्धापनं दत्तवान्।

## हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**नन्दिनी-** अद्य मया एका रुचिरा वार्ता पठिता। एकेन उद्योगिना अमेरिका-देशस्य समयानुसारं रात्रिकार्यस्य लाभाः कष्टाः च वर्णिताः।

**काव्या-** सत्यम्, अधिकं वेतनं तु लब्धं किन्तु निद्रा स्वास्थ्यं च नष्टे।

**काव्या-** अपरं पश्य, लक्ष्मणपुरे एकेन जनेन द्विचक्रिकां चालयता स्वस्य श्वानः मार्गे भ्रामितः। तस्य चलच्चित्रम् अन्तर्जाले बहुभिः जनैः दृष्टम्।

**नन्दिनी-** तत् अतीव भयावहं दृश्यं जातम्। श्वानस्य तस्य जनस्य च सुरक्षा सङ्कटे पातिता।

**नन्दिनी-** अन्या वार्ता यन्त्रमानव- शिक्षण- विषयिणी अस्ति। यन्त्रमानवानां शिक्षणार्थं गृहकार्याणां चलच्चित्रं प्राप्तुं कृत्रिमबुद्धि-संस्थाभिः धनं दत्तम्।

**काव्या-** ओहो! गृहस्वच्छता निःशुल्का कृता किन्तु गृहाणां गोपनीयता अपहृता।

**काव्या-** अन्या वार्ता विमानपत्तने सामग्री- वाहिनी-पट्टिकायाः विषये अस्ति। सः प्रवासी तत् कोलाहल-दृश्यं प्रसारितवान् अस्ति।

**नन्दिनी-** एतत् सत्यं कथितम्। जनैः धैर्यं न धृतम्, अतः सर्वत्र कोलाहलः जातः। अद्यतनः कार्यक्रमः अत्रैव समाप्तः। धन्यवादः काव्ये।